# ॥ મન્યુ સૂક્તમ ॥

*ઋગ્વેદ સંહિતા; મણ્ડલં ૧૦; સૂક્તમ ૮૩*

યસ્તે મન્યોઽવિધદ્વજ્ર સાયક સહ ઓજ: પુષ્યતિ વિશ્વમાનુષક ।
સાહ્યામ દાસમાર્યં ત્વયા યુજા સહસ્કૃતેન સહસા સહસ્વતા ॥ ૧ ॥

મન્યુરિન્દ્રો મન્યુરેવાસ દેવો મન્યુર્હોતા વરુણો જાતવેદા: ।
મન્યું વિશ ઈળતે માનુષીર્યા: પાહિ નો મન્યો તપસા સજોષા: ॥ ૨ ॥

અભીહિ મન્યો તવસસ્તવીયાન તપસા યુજા વિ જહિ શત્રૂન ।
અમિત્રહા વૃત્રહા દસ્યુહા ચ વિશ્વા વસૂન્યા ભરા ત્વં ન: ॥ ૩ ॥

ત્વં હિ મન્યો અભિભૂત્યોજા: સ્વયમ્ભૂર્ભામો અભિમાતિષાહ: ।
વિશ્વચર્ષણિ: સહુરિ: સહાવાનસ્માસ્વોજ: પૃતનાસુ ધેહિ ॥ ૪ ॥

અભાગ: સન્નપ પરેતો અસ્મિ તવ ક્રત્વા તવિષસ્ય પ્રચેત: ।
ત્વં ત્વા મન્યો અક્રતુર્જિહીળાહં સ્વા તનૂર્બલદેયાય મેહિ ॥ ૦૫ ॥

અયં તે અસ્મ્યુપ મેહ્યર્વાઙ પ્રતીચીન: સહુરે વિશ્વધાય: ।
મન્યો વજ્રિન્નભિ મામા વવૃત્સ્વ હનાવ દસ્યૂઁ ઋત બોધ્યાપે: ॥ ૬ ॥

અભિ પ્રેહિ દક્ષિણતો ભવા મેઽધા વૃત્રાણિ જઙ્ઘનાવ ભૂરિ ।
જુહોમિ તે ધરુણં મધ્વો અગ્રમુભા ઉપાંશુ પ્રથમા પિબાવ ॥ ૦૭ ॥

*ઋગ્વેદ સંહિતા; મણ્ડલં ૧૦; સૂક્તમ ૮૪*

ત્વયા મન્યો સરથમારુજન્તો હર્ષમાણાસો ધૃષિતા મરુત્વ: ।
તિગ્મેષવ આયુધા સંશિશાના અભિ પ્ર યન્તુ નરો અગ્નિરૂપા: ॥ ૧ ॥

અગ્નિરિવ મન્યો ત્વિષિત: સહસ્વ સેનાનીર્ન: સહુરે હૂત એધિ ।
હત્વાય શત્રૂન વિ ભજસ્વ વેદ ઓજો મિમાનો વિ મૃધો નુદસ્વ ॥ ૨ ॥

સહસ્વ મન્યો અભિમાતિમસ્મે રુજન મૃણન પ્રમૃણન પ્રેહિ શત્રૂન ।
ઉગ્રં તે પાજો નન્વા રુરુધ્રે વશી વશં નયસ એકજ ત્વમ ॥ ૩ ॥

એકો બહૂનામસિ મન્યવીળિતો વિશં–વિશં યુધયે સં શિશાધિ ।
અકૃત્તરુક ત્વયા યુજા વયં દ્યુમન્તં ઘોષં વિજયાય કૃણ્મહે ॥ ૪ ॥

વિજેષકૃદિન્દ્ર ઈવાનવબ્રવો(ઓ)૩ સ્માકં મન્યો અધિપા ભવેહ ।
પ્રિયં તે નામ સહુરે ગૃણીમસિ વિદ્મા તમુત્સં યત આબભૂથ ॥ ૫ ॥

આભૂત્યા સહજા વજ્ર સાયક સહો બિભર્ષ્યભિભૂત ઉત્તરમ ।
ક્રત્વા નો મન્યો સહ મેદ્યેધિ મહાધનસ્ય પુરુહૂત સંસૃજિ ॥ ૬ ॥

સંસૃષ્ટં ધનમુભયં સમાકૃતમસ્મભ્યં દત્તાં વરુણશ્ચ મન્યુઃ ।
ભિયં દધાના હૃદયેષુ શત્રવઃ પરાજિતાસો અપ નિ લયન્તામ ॥ ૭ ॥

ધન્વનાગાધન્વ નાજિંજયેમ ધન્વના તીવ્રાઃ સમદો જયેમ ।
ધનુઃ શત્રોરપકામં કૃણોતિ ધન્વ નાસર્વાઃ પ્રદિશો જયેમ ॥

ભદ્રં નો અપિ વાતય મનઃ ॥

ઓં શાન્તા પૃથિવી શિવમન્તરિક્ષં દ્યૌર્નો દેવ્યટભયન્નો અસ્તુ ।
શિવા દિશઃ પ્રદિશ ઉદ્દિશો નટઆપો વિશ્વતઃ પરિપાંતુ સર્વતઃ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

www.YouSigma.com